अङ्क-२५
जनवरी-जून २०१५

**वेदविद्या**
ISSN-२२३०-८९६२

# वेदार्थानुशीलने सायणाचार्यस्य महत्त्वम्

**डॉ. दे. दयानाथः**

जानन्त्येव मनीषिणो यद् वेदा एवास्माकं धर्मस्य मूलस्रोत इति । वेदेऽन्तर्निहिततत्त्वान्येव कालान्तरे महर्षयो भिन्नभिन्नदर्शनरूपेण जगति प्रावर्तयन् । वेदस्य लक्षणं सर्वैरपि दार्शनिकैः स्वस्ववचसाऽनेकधा प्रदर्शितम् । चतुर्वेदभाष्यकृताऽऽचार्यसायणेन वेदलक्षणमित्थं प्रपञ्चितम् –

**इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः ।**[1]

इष्टप्राप्तेरनिष्टपरिहारस्य चालौकिकमुपायं यो ग्रन्थो वेदयति ज्ञापयति स वेदपदवाच्य इति । अत्रालौकिकपदेन प्रत्यक्षानुमाने व्यावर्त्येते । न केऽपि तार्किका अग्निष्टोमनामकसोमयागेन इष्टस्य स्वर्गस्य प्राप्तिः कलञ्जभक्षणवर्जनेनानिष्टस्य परिहारश्च भवतीत्यनुमानसहस्रेणापि ज्ञातुं प्रभवन्ति । यतोऽलौकिकसाधनविषये भौतिकजगतामुपर्याधारितं प्रत्यक्षप्रमाणं नितान्तं व्यर्थं भवति । तथैव तदुपर्याधारितम् अनुमानमपि व्यर्थमेव भवति। अत एव अलौकिकोपायबोधक इति प्रपञ्चितम्। तदुक्तम्–

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।**
**एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता ॥**[2]

वेदार्थानुशीलनपरम्परा प्राचीनकालादारभ्य यास्क-स्कन्दस्वामि-उद्गीथ-भट्टभास्करादिभिर्मनीषिभिः संरचिता वर्तते । वेदार्थानुशीलनपरम्पराम् इतिहासदृष्ट्या कालत्रये विभक्तुं शक्नुमः। तद्यथा–

१. प्राचीनकालः  २. मध्यकालः  ३. अर्वाचीनकालः

प्रथमं तावत् ब्राह्मणग्रन्थेष्वेव वेदार्थावबोधनाय बह्वन्युदाहरणानि प्राप्तुं शक्यन्ते । अस्ति हि ब्राह्मणे यज्ञादीनां वर्णनम्। अपि च तत्र तत्र मन्त्रगतपदानां व्याख्यानं, शब्दव्युत्पत्तिः, इति वेदार्थावबोधनाय नितरामुपकरोति ब्राह्मणभागः। एतासां व्युत्पत्तीनामतीवादररूपेण निरुक्तकारेण तत्र तत्र "इति ह विज्ञायते" इति रूपेण सन्निवेशः कृतः। अर्थावबोधने संहितायाः पदपाठा अपि नितरामुपकाराय कल्पन्ते । दुर्गाचार्यो निरुक्तस्योपरि स्वीयां टीकां निर्मितवान् ।

मध्यकाले बहवो वेदभाष्यकाराः स्वं स्वं भाष्यं वेदानामुपरि रचितवन्तः। तत्र भट्टभास्करः, माधवभट्टः, वेङ्कटमाधवः, धानुष्कयज्वा, आनन्दतीर्थः, माधव इत्यादय आचार्याः प्रधानतया मन्यन्ते ।

---

[1] तै.सं. सायणभाष्यभूमिका
[2] सायणेन उद्धृत: श्लोक:

तैत्तिरीयसंहिताया उपरि भट्टभास्करेण **ज्ञानयज्ञ**नामकं स्वीयं भाष्यमतीव विद्वत्तापूर्णं निर्मितम्। भाष्येऽस्मिन् प्राचीनग्रन्थेभ्य उद्धृतानि बहूनि उदाहरणानि सन्ति । यज्ञपरकव्याख्यया सह आध्यात्मिका आधिदैविका अर्था अप्यनेन प्रदर्शिता: । यथा "हंस: शुचिषत्" इति मन्त्रव्याख्यानावसरे हंसशब्दस्यार्थो यज्ञपक्षे रथ: "हन्ति पृथिवीम्" इति, अधिदैवपक्षे आदित्य इति तथा अध्यात्मपक्षे आत्मेति च तेन स्फुटीकृत:। एवमेव तत्र तत्रान्येषां मन्त्राणामपि व्याख्या कृता वर्तते ।

ऋग्वेदभाष्यकृद् आचार्य: स्कन्दस्वामी स्वभाष्ये सूक्तारम्भे तत्तन्मन्त्राणाम् ऋषीणां, देवतानां, छन्दसां चोल्लेखं कृतवान् ।

आनन्दतीर्थेणापि स्वीयं भाष्यम् ऋग्वेदस्योपरि प्रणीतं वर्तते। अस्यैवापरं नाम **'मध्व'** इति, येन द्वैतवादिमाध्वसम्प्रदाय: प्रवर्तित:। एतेषां भाष्यं न सम्पूर्णस्य ऋग्वेदस्योपरि, अपि तु कतिपयसूक्तानामेवास्ति । भाष्यमिदं छन्दोबद्धं वर्तते। भाष्येऽस्मिन् अनेन सर्वत्र भगवत: श्रीमन्नारायणस्य प्रतिपादनं कृतम्। "वेदैश्च सर्वैरहमेव वेद्य:"[३] इति भगवतोक्तत्वादानन्दतीर्थस्त-दाधारीकृत्य स्वीयं श्रीमन्नारायणप्रतिपादकं भाष्यं निर्मितवान् । तदुक्तं स्वीये भाष्यारम्भे –

**स पूर्णत्वात् पुमान् नाम पौरुषे सूक्त ईरित: ।**
**स एवाखिलवेदार्थ: सर्वशास्त्रार्थ एव च ॥**

वर्तमानयुगे महर्षिदयानन्दस्य भाष्यं सम्पूर्णयजुर्वेदस्योपर्युपलभ्यते। ऋग्वेदस्योपर्येतेषां भाष्यं सप्तममण्डलस्य १६१ सूक्तपर्यन्तमेवोपलभ्यते। एत एकेश्वरवादिन आसन्, अतो वेदे वर्णितानाम् अग्नि-मरुत्-सोम-वरुणादिदेवानां या स्तुति: कृता तत्सर्वमपि एकस्य परमेश्वरस्यैव स्तुतिरिति ते मन्यन्ते । एतेषां मते वेदे समुपलभ्यमाना सर्वे शब्दा यौगिका:। वेदमन्त्राणां विनियोगोऽत्यन्तं महत्त्वपूर्णं वर्तते । किन्त्वेतेषां भाष्ये कुत्रापि मन्त्रस्य विनियोगदृशाऽर्थो नोक्तः। सर्वेऽपि वेदमन्त्रा: परमात्मप्रतिपादका एव इत्येतेषां मतम् । पाश्चात्यानां वेदं प्रति अनुरागं दृष्ट्वा भारतीयानामपि मन आश्चर्यान्वितमवश्यं भवति । भारतं न तेषां जन्मभूमि:, वेदो न तेषां धर्मग्रन्थस्तथापि वेदस्याध्ययने वेदार्थानुशीलने वेदग्रन्थानां मुद्रणे चैतेषां परिश्रमो नितान्तं श्लाघनीयो वर्तते । तत्र प्रो. माक्स् मुल्लर्, डा.ए.बी. कीथ्, डा. राथ् , डा. वेबर्, डा. मरिस् ब्लूम्फील्ड् (Dr. Maurice Bloomfield), राल्फ् ग्रिफित् (Ralph T.H. Griffith) इत्यादय: प्रमुखा भवन्ति, ये वेदानामनुवादेन, वेदानां शुद्धेन परिष्कृतेन प्रकाशनेन, वेदकोषनिर्माणादिना स्वीयं जीवनं व्यतीतवन्त: ।

सर्वप्रथमम् आङ्ग्लेयविद्वान् डा. विल्सन् महोदय: सायणभाष्यमाधारीकृत्य ऋग्वेद-स्योपर्याङ्ग्लानुवादं १८५० तमे वर्षे प्रणीतवान् । डा. ग्रास्मेन् महोदय: ऋग्वेदकोषे ऋग्वेदस्थपदानां

---

[३] भगवद्गीता १५.१५

प्रामाणिकमर्थं प्रदर्शितवान्। अपि च शर्मण्य (German) भाषया पद्यात्मकानुवादोऽपि १८७६-७७ तमे वर्षे एतेनाकारि । तस्मिन्नेव वत्सरे डा. लुड्विग्-महोदयेन पद्यात्मकानुवादः प्रास्तावि यस्तेषां द्वाविंशतिवर्षात्मकं कार्यमासीत् । डा. कीथ्-महोदयः कृष्णयजुर्वेदस्य तैत्तिरीयसंहिताया उपरि स्वीयं भाष्यं १९१४ तमे वर्षे हार्वर्ड् ओरियन्टल् सीरीज इति शृङ्खलायां भागद्वयेन प्राकाश्यं नीतवान् । अनुवादोऽयं विद्वज्जनानां मध्येऽतीवोपादेय आसीत् । अन्ये बहवः पाश्चात्यविद्वांसो वेदे वेदाङ्गे च कृतपरिश्रमा भूत्वा वेदे निहितानां तत्त्वानामवबोधनाय प्रयासं विहितवन्तः।

**सायणाचार्यः**

वस्तुतो वेदभाष्यम् इति श्रवणेन श्रीमत्सायणाचार्यकृत**वेदार्थप्रकाश** एव मनसि प्रथममभ्युदेतीति कथने न काप्यतिशयोक्तिरिति मन्यामहे । यतः को वा तादृक् विद्वान् आसीत् येन संहितापञ्चकस्य तथा त्रयोदशब्राह्मणग्रन्थानां विशदं प्रामाणिकं च भाष्यम् उपस्थापितम् ।

एतेषां भाष्यं यज्ञपद्धतिमाश्रित्यैव वर्तते । उक्तं हि – **"वेदा हि यज्ञार्थमभिप्रवृत्ताः०"** । एते महाशयास्तत्र तत्र ब्राह्मण-व्याकरण-निरुक्तादिवाक्यानामुदाहरणपूर्वकं स्वीयं भाष्यं परम्परागतं निर्मितवान् । **"न तु पृथक्त्वेन मन्त्राः निर्वक्तव्या प्रकरणश एव निर्वक्तव्या"**[४] इति कथनानुसारं तत्र तत्र ब्राह्मणश्रौतसूत्रादिवाक्यद्वारा प्रकरणमाश्रित्य भाष्यमिदं निर्मितवान् सायणः । अयं **मन्त्राभ्यूहोऽभ्यूढोऽपि श्रुतितोऽपि तर्कतः**[५] इति यास्कः । अर्थात् मन्त्राणां विचारः परम्परागतार्थेन सह निरूपयितव्य इति । सायणः स्वकीये भाष्ये सर्वत्रापि परम्परागतार्थान् मन्त्राणां निरूपितवान् । ऋग्वेदभाष्ये प्रथमाष्टके यद्याकरणविषयशब्दप्रक्रिया ऋग्वेदशब्दानां प्रदर्शिता तेनैवैतेषां व्याकरणाभिज्ञता सुष्ठु प्रतिभासते । तत्र सायणेनोक्तम् –

**एतस्मिन् प्रथमोऽध्यायः श्रोतव्यः सम्प्रदायतः ।**
**व्युत्पन्नस्तावता सर्वं बोद्धुं शक्नोति बुद्धिमान् ॥**[६] इति ।

संहिताया भाष्ये तेन यथाक्रमं ब्राह्मणवाक्यानामुदाहरणपूर्वकं तत्तन्मन्त्राणाम् अर्थनिर्णयो विनियोगेन सह कृतः । अर्थनिर्णये ब्राह्मणानां महत्त्वं पूर्ववर्तिभाष्यकारः वेङ्कटमाधव आह –

**संहितायास्तुरीयांशं विजानन्त्यधुनातनाः ।**
**निरुक्तव्याकरणयोरासीद् येषां परिश्रमः ॥**
**अथ ये ब्राह्मणार्थानां विवेक्तारः कृतश्रमाः ।**
**शब्दरीतिं विजानन्ति ते सर्वं कथयन्त्यपि ॥** इति ।

---

[४] निरु. १३.११
[५] निरु. १३.११
[६] ऋ.भा.भूमिका, सायणः

श्लोकयुगलेनानेन सुस्पष्टं ज्ञायते यत् मन्त्राणामर्थकरणं न केवलं निरुक्तव्याकरणयो: सहयोगेन शक्यते, अपि च ब्राह्मणवाक्यानां विवेचनेनैव मन्त्रार्था: स्फुटा भवन्ति इति ।

सायणभाष्ये मन्त्रव्याख्यानावसरे तन्मन्त्रब्राह्मणमपि तेनोदाहृतम् । यथा – तैत्तिरीयसंहिताया दर्शपूर्णमासेष्टिमन्त्रव्याख्यानावसरे तद्ब्राह्मणगतस्य तृतीयाष्टकस्य द्वितीय-तृतीयप्रश्नावपि सहैवोदाहरति । तथैव सोमप्रकरणे तद्ब्राह्मणरूपं षष्ठकाण्डमपि सहैव व्याख्याति । मन्त्रार्थकरणे ब्राह्मणवाक्योदाहरणपूर्वकम् अभीष्टार्थं प्रतिपादयति । यथा - इष्टिप्रकरणे तृणभक्षणायारण्यं प्रति गा: प्रेरयत्यध्वर्यु: । तत्र "**वायवं: स्थ**"[७] इति मन्त्र: । सायणस्तन्मन्त्रव्याख्याने गवाम् अन्तरिक्षे सञ्चारत्वाद् वायोश्चान्तरिक्षस्याधिष्ठातृत्वात् तासां वायुदेवताकत्वं प्रपञ्चयति "**वायुर्वा अन्तरिक्षस्याध्यक्षा: । अन्तरिक्षदेवत्या: खलु वै पशव:** ॥"[८] इति ब्राह्मणवाक्यमुदाहरति ।

एवमन्योऽपि प्रसिद्धो मन्त्रो वर्तते –

**नवों नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रें ।**

**भागं देवेभ्यो विदधात्यायन् प्र चन्द्रमास्तिरति दीर्घमायु:** ॥[९] इति ।

मन्त्रस्यास्य विनियोग: "**एतमादित्यं चरुं निरवपन्**"[१०] इति विहितायां काम्येष्टौ पुरोनुवाक्यरूपेण भवति। आदित्यदेवतारूपाया इष्टेर्विनियोगरूपेण श्रुत्या विहितोऽयं मन्त्र: सायणेन प्रयोगदृष्ट्या यथाश्रुति व्याख्यात: । तत्र मन्त्रगतचन्द्रशब्दस्यार्थस्तेन "आदित्य" इत्येव कृत: । वदति च – "**आदित्यस्य चन्द्रदीप्तिकारणात् चन्द्राभेदेनादित्य इह स्तूयते**"[११]॥ इति । उक्तं च निरुक्ते – "**तस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते**"[१२] इति । श्रुतौ च - **सुषुम्न: सूर्यरश्मि: चन्द्रमा गन्धर्व:**[१३] ॥ इति । एवंरूपेण सर्वत्र प्रयोगदृष्ट्या यथाश्रुति भाष्यरचनेन मन्त्राणां याथार्थ्यं विशदीकृतवन्त: सायणाचार्या: ।

श्रौतसूत्रोदाहरणे बौधायन-आपस्तम्बयोर्मतभेदान् उचितस्थलेषु प्रदर्शयन्ति ते । यथा – "**देवो व: सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमघ्निया देवभागमूर्जस्वती: पयस्वती: प्रजावतीरनमीवा अयक्ष्मा मा व: स्तेन ईशत माऽघशंसो रुद्रस्य हेति: परि वो वृणक्तु**[१४]॥ इति मन्त्रव्याख्यानावसरे

[७] तै.सं. १.१.१
[८] तै.ब्रा.३.२.१
[९] तै.सं. २.४.१४
[१०] तै.सं. २.३.५
[११] सा.भा.तै.सं. २.४.१४
[१२] निरु. २.६
[१३] तै.सं. ३.४.७
[१४] तै.सं.१.१.१

बौधायनः- **अथैषां मातृः प्रेरयति देवो वः सविता.....वृणक्तु**[१५] इति । आपस्तम्बस्तु मन्त्रत्रयमिति उद्दिश्य विनियोगप्रकारं सूत्रयति – **"देवो वः सविता प्रार्पयतु इति शाखया गोचराय गाः प्रस्थापयति, प्रस्थितानामेकां शाखयोपस्पृशति दर्भैर्दर्भपुञ्जीलैर्वा आप्यायध्वमघ्निया.....रुद्रस्य हेतिः परि वो वृणक्तु इति प्रस्थिता अनुमन्त्रयते"॥** [१६] इति । सूत्रद्वयपक्षमपि प्रदर्श्य मन्त्रस्यास्य व्याख्या कृता सायणेन । सर्वत्रापेक्षितस्थलेषु पक्षद्वयमपि प्रसङ्गे व्याख्याय मन्त्रार्थान् योजयति इति विशिष्टतमं भाष्यं सायणस्य ।

स्मृत्यादिवाक्यान्यप्युदाहरति सायणः । यथा – **"द्रप्सश्चस्कन्द पृथिवीम्"**[१७] इति मन्त्रभाष्ये यथा मया हुतो हविरादित्यादिस्थानेषु सञ्चरद् उपकरोति तथा भावयामि इत्यर्थः कृतस्तेन । उक्तमन्त्रार्थस्य सम्यक्त्वसाधनाय स्मृतिवाक्यं दर्शयति –

**अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।**

**आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः ॥**[१८] इति ।

एवम् अग्निचयनप्रकरणे **"अपेत वीत"** [१९] इति ऋचो व्याख्यानसन्दर्भे पृथिव्या अस्या यमस्याधिपत्यम् उक्त्वा तद्भृत्यानां देवयजनप्रदेशाद् अपगमनं प्रार्थयते । तद् ब्राह्मणमप्युदाहृत्य – **"यावती वै पृथिवी तस्यै यम आधिपत्यम्"** [२०] इति पृथिव्या अस्या यमाधिपत्यत्वं प्रपञ्चयति । तमिमं मन्त्रं ब्राह्मणवाक्योदाहरणेन प्रशंसति । यथा – **"इष्वग्रेण वा अस्या अनामृतमिच्छन्तो नाविन्दन्"**[२१] ॥ इति । पुरा देवा अनामृतां पृथिवीमिच्छन्तः सर्वत्रान्विष्टवन्तः, किन्तु तादृशीं यागयोग्यां भूमिं बाणाग्रमात्रमपि नैवालभन्त । यतः सर्वत्र भूमिभागानां शवसङ्कुलत्वात् । स एवार्थो महाभारतेऽपि प्रोक्त इति दर्शयति -

**अत्र भीष्मशतं दग्धं द्रोणानां च शतत्रयम् ॥** इति ।

अथ 'रुद्रप्रश्न' इति विख्याते मन्त्रभागे तदीयं भाष्यं सरलम् अस्ति । यद्यपि रुद्रप्रश्नस्य ज्ञानाङ्गत्वं सर्वैरभिधीयते, तथापि सायणेन रुद्रप्रश्नस्य ज्ञानाङ्गत्वं विहाय केवलं यज्ञपद्धत्या व्याख्या कृता इति केचनाक्षिपन्ति । तत्तु अपरिचितवेदार्थप्रकाशस्यैवेत्यवगन्तव्यम् । सायणेन रुद्रप्रश्नभाष्योपक्रमे स्पष्टं प्रपञ्चितम् –

**इष्टकाचितयः सर्वाश्चतुर्थे हि समापिताः ।**

**रुद्राध्याये पञ्चमे तु चित्यग्नौ होम उच्यते ॥**

**कर्मप्रकरणे पाठात् कर्माङ्गत्वमपीष्यते ।**

---

[१५] बौ.श्रौ.सूत्रम्, १.१

[१६] आ.श्रौ.सूत्रम्, १.२.४-८

[१७] तै.सं.४.२.८

[१८] मनुः ३.७६

[१९] तै.सं.४.२.४

[२०] तै.सं.५.२.३

[२१] तत्रैव

**ज्ञानहेतुत्वमप्यस्य सर्वोपनिषदीरितम् ॥**
**किं जप्येनामृतत्वं नो ब्रूहीत्युक्तो मुनिर्जगौ ।**
**शतरुद्रियकेणेति जाबाला आमनन्ति हि ॥**
**स्मृत्यागमपुराणेषु रुद्राध्यायप्रशंसनम् ।**
**बह्वस्ति तद्विस्तरेण रुद्रकल्पेऽभिधास्यते ॥**
**इह कर्माङ्गता यादृग्वर्णिता ब्राह्मणेन ताम् ।**
**बोद्धुं शब्दार्थमात्रस्य विवृतिः क्रियते मया ॥**[22] इति ।

रुद्राध्यायस्य तेन यथाब्राह्मणं कर्माङ्गतया श्रौतसूत्राणामुदाहरणेनाल्पाक्षरमपि सद् अतिगम्भीरं भाष्यं विरचितम् । दशमानुवाकस्य अष्टममन्त्रव्याख्याने –

**स्तुहि श्रुतं गर्तसदं युवानं .... निर्वपन्तु सेनाः ॥**[23] इति ।

अत्र "गर्तसद्" इति शब्दस्य "गर्तसदं गर्तसदृशे हृदयपुण्डरीके सर्वदा तिष्ठन्तम्" इति प्रदर्श्य स एव मन्त्रार्थः भगवत्सम्मत इति गीतारूपां स्मृतिमुदाहरति –

**ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥**[24] इति ।

**"विकिरिद विलोहित... निर्वपन्तु ताः"**[25] ॥ इति मन्त्रे विलोहितशब्दस्य द्वेधाऽर्थः कृतस्तेन । विलोहितः लौहित्यरहितः श्वेतः शिव: इति । अत एव पञ्चाक्षरध्याने मान्त्रिका आमनन्ति इति श्लोकमिममुद्धरति – **ध्येयो मुक्तापरागामृतरसकलिताद्रिप्रभः ॥** इति ।
अथवा विशेषेण लोहितः विष्णुः, इत्यर्थं वदति । तदर्थं श्लोकमिममुद्धरति –

**काञ्चनाभो ध्येयः पद्मासनस्थः ॥** इति ।

अनेन ज्ञायते यत् सायणः स्वीय**वेदार्थप्रकाशे** यथोचितं स्मृतिवाक्यानामुदाहरणपूर्वकं वेदार्थं सुष्ठु प्रपञ्चयति इति । तैत्तिरीयसंहिताया भाष्ये मीमांसाविषयकचिन्तनमपि यथावसरं कृतन्तेन । चतुर्थकाण्डे **"एकयाऽस्तुवत प्रजाः"**[26] इत्यादि सप्तदशमन्त्रैः सृष्टिशब्दाभिधेया इष्टका उपधातव्याः । तच्च प्रदर्शितं सायणेन - **"एकयास्तुवतेति सप्तदश सृष्टीः"** ॥(बौधायनः) इति । मन्त्रैरेतैः साध्यं इष्टकोपधानं विधीयते ब्राह्मणेन – **"सृष्टीरुपदधाति"**[27] इति ॥ सृजतिधातुयुक्तमन्त्रैः उपधेया इष्टकाः सृष्टयः । अत्र मीमांसा

---

[22] तै.सं.४.५.१
[23] तै.सं. ४.५.१०.८
[24] भगवद्गीता १८.६३
[25] तै.सं. ४.५.१०
[26] तै.सं. ४.३.१०
[27] तै.सं. ५.३.४

इत्यारभ्य सायणेन सृष्टिशब्दविषयकमीमांसाविचारो न्यायविस्तरगतश्लोकेन प्रदर्शित: । न केवलमत्र किन्तु समग्रतैत्तिरीयसंहिताभाष्येऽपेक्षितस्थलेषु मीमांसाशास्त्रविचारा: प्रदर्शिता: सायणेन ।

सायणस्य सर्वस्यापि वैदिकवाङ्मयावदानस्य सम्पूर्णतयाऽवलोकनं क्रियते चेत् तस्य गरिमा, वैदिकी पद्धति:, परम्परागतविद्यासम्पत्तिरित्यादिविषया: दृष्टिपथं समायान्ति । अद्यत्वे यदि सायणाचार्यस्य भाष्यं नाभविष्यत् चेत् वेदार्थानुशीलनस्य कीदृशी दयनीयदशाऽभविष्यत् इति ऊहितुमपि न शक्यते । वस्तुत: पाश्चात्यानां वेदार्थानुशीलने कापि गति: प्राप्ता इत्युक्ते, सायणाचार्यस्यानुकम्पयैव इति निर्विवादं वक्तुं शक्यते । ऋग्वेदस्याङ्लभाषया प्रथमानुवादकर्ता डॉ. विल्सन् (Horace Hayman Wilson) महोदयो मुक्तकण्ठं सायणाचार्यस्य वेदवेदाङ्गविषयकज्ञानं प्रशंसितवान् । यथा – Sayana undoubtedly had knowledge of his text far beyond the pretensions of any European scholar, and must have been in possession either through his own learning or that of his assistants, of all the interpretations which have been perpetuated by traditional teaching from the early times. इति ।[२८]

तथैव सायणभाष्यस्य प्रथमयूरोपीयसम्पादकानां मैक्समुल्लर महाभागानां वाक्यमपि नितान्तं सत्यं भवति । यथा – We ought to bear in mind that five and twenty five years ago, we could not have made even our first steps, we could never at least have gained a firm footing without his leading strings इति ।[२९]

एकस्यैव मन्त्रस्य विनियोगानुसारं भिन्नरूपेण वर्णनम्, सर्वासामपि ऋचाम् अधियज्ञपूर्वकं व्याख्यानम् इत्याद्याक्षेपा आधुनिकै: सायाणाचार्यस्योपरि क्रियन्ते । आक्षेपा इमे न युक्तियुक्ता: । सायणस्य वेदार्थे महत् पाटवमासीत् । ज्ञानोपास्तिदृष्ट्यापि सायणेन बहुषु स्थलेषु व्याख्यानं कृतम् । वाक्-सृष्टि-पुरुष-हिरण्यगर्भादिसूक्तानि द्रष्टुं शक्यन्ते येषु तै: ज्ञानपरकमपि भाष्यं कृतं वर्तते । इदानीं वेदार्थनामके दुर्गमे दुर्गे अस्माभि: प्रवेश: प्राप्तव्य इत्युक्ते, सायणाचार्यस्य **वेदार्थप्रकाशनामक**सिंहद्वारेणैव शक्यते इति कथने न कापि विप्रतिपत्तिरिति शम् ॥

डॉ. दे. दयानाथः
सहायकाचार्य: (सं), वेदविभाग:
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालय:)
श्रीरणवीरपरिसर:, कोट-भलवालःजम्मू: - १८११२२

[२८] Translation of Rigveda, H.H. Wilson
[२९] Introduction to Rigveda, F. Max Muller